International Journal of Sanskrit Research 2019; 5(4): 224-230

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 224-230
© 2019 IJSR
www.anantaajournal.com
Received: 28-05-2019
Accepted: 30-06-2019

**डॉ. अपूर्वशर्मा**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्,
नई दिल्ली, भारत

**Correspondence**
**डॉ. अपूर्वशर्मा**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्,
नई दिल्ली, भारत

# भाषाशिक्षणे उच्चारणशिक्षणस्य महत्त्वम्

**डॉ. अपूर्वशर्मा**

## उपोद्घातः

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।। [1]

'शिक्ष विद्योपादाने' इति धातुतः निष्पन्नस्य 'शिक्षा' शब्दस्य अर्थः अज्ञानान्धकारं दुरीकृत्य प्रकाशं प्रति नयनम् इति भवति । एतस्य लक्ष्यन्तु शिशोः सर्वाङ्गीणविकासः इति । एतस्मिन् एव अन्तर्भवति आध्यात्मिकविकासः नैतिकविकासश्च । एतत् द्वयमपि आबाल्यात् शिशोः मस्तिष्के समागच्छति । अत्र मातृभाषा तथा च शास्त्रीयभाषा एतत् द्वयमपि महदुपकरोति ।

शिक्षा निरन्तरप्रवाहमाना एका प्रक्रिया विद्यते । शिक्षाप्राप्तौ जगत्यस्मिन् मानवः एव समर्थः विद्यते इत्यतः मानवः शिक्षया जीवश्रेष्ठत्वं प्राप्नोति । मानवं विना इदं जगत् अविकसितम् अन्धकारमयञ्च अभविष्यत् । मानवस्य श्रेष्ठत्वस्य कारणन्तु शिक्षैव । मानवः अनुसन्धित्सुः इत्यस्मात् सर्वदा नित्यनूतनसामग्रीणां प्रस्तुतीकरणे संलग्नः वर्तते । खगोलस्य "संकर्षणम्" (Big bang theory) इति आन्दोलनस्य फलतः ग्रहाणां समुत्पत्तिः तथैव अस्याः धरायाश्च समुद्भवः । क्षित्यप्तेजोमरुत्व्योमानां सम्मिश्रणरूपे अस्मिन् जगति मानवानाम् उत्पत्तिः दीर्घकालानन्तरमेवेति जीवतत्त्वविद्भिः कल्प्यते । पृथिव्याः उत्पत्तिविषये विश्वस्य सर्वप्राचीनग्रन्थस्य ऋग्वेदस्य दशममण्डलस्य नासदीयसूक्ते प्रतिपादितं विद्यते इत्येवम् –

नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमापरोयत् ।
किमावरीवः ! कुह कस्य शमन्नम्भः किमासीद गहनं गम्भीरम् । [2]

एतत्सर्वमपि दैवदत्तमेव किन्तु एतादृशं यज्ज्ञानं तत्तु मनुजानाम् अनुसन्धित्सुमनसः फलमेवेति । मनसि अनुसन्धित्सा अविद्यते चेत् किमपि ज्ञानं नैव प्राप्यते ।

---

[1] चाणक्यनीतिः १०५

[2] ऋग्वेदः 10.129.1.

मनसि जिज्ञासा विद्यते इत्यस्मादेव कश्चिदपि कठिनादपि कठिनतरं विषयम् आत्मसात्कर्तुं प्रभवति । उद्यमः एव मानवानां श्रेष्ठत्वस्य मुख्यकारणमिति निःसङ्कोचतया वक्तुं शक्यते । उक्तञ्च -

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

तथा एवमपि उक्तम् "उद्यमिनं पुरुषसिंहमुपैति लक्ष्मीः" इति। अनेन ज्ञायते यत् मानवानां श्रेष्ठत्वस्य कारणेन जगदिदं प्रकाशमयं ज्ञानमयं विद्यते उत ज्ञानस्य कारणादेव मानवः श्रेष्ठत्वमवाप्नोतीति । यत्किमपि भवतु नाम मानवस्य अनुसन्धिसुमनसः फलेनैव सर्वमपि असाध्यं साध्यं भवति । बालाः अपि निरन्तरम् अनुसन्धित्सया प्रश्नावतरणं कुर्वन्ति, यावत् अनुसन्धित्सा शान्तं न याति । अनुसन्धित्सा, जिज्ञासा तथा च कल्पना इत्येतेषां त्रयाणां समन्वयात्मकः मानवः नूतनाविष्काराणां पृष्ठपोषकः विद्यते । एतत् सर्वमपि शिक्षायाः फलेनैव सिद्ध्यति । अतः एव अस्मिन् लेखे शिक्षा इत्यनेन कः अभिप्रायः ? भाषाशिक्षणं किम् ? भाषाशिक्षणं किमर्थम् ? भाषाशिक्षणं कथम् ? भाषाशिक्षणे उच्चारणशिक्षणस्य किं महत्त्वम् ? इति एतेषां विषये विस्तृतरूपेण चर्चा विद्यते ।

**शोधलेखः**

शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना ।
न गुह्यगोपने शक्तं न च दंशनिवारणे ।। 3

अस्मिन् श्लोके शिक्षाहीनस्य का स्थितिः इति स्पष्टतया उल्लिखितम् अस्ति । अस्य श्लोकस्य अर्थः एवम् अस्ति – शिक्षाहीनस्य जनस्य जीवनं शुनकस्य पुच्छमिव अस्ति । यथा शुनकस्य पुच्छं गुह्यगोपने तथा च मशकादीनां दंशनिवारणे समर्थं न भवति अर्थात् शुनकस्य पुच्छं यथा व्यर्थं भवति तथैव शिक्षया विहीनस्य जनस्य जीवनम् अपि व्यर्थं भवति ।

शिक्षा इत्यस्य प्राचीनकाले विद्या इति नामान्तरमविद्यत । समाजे परिदृश्यमानानां सर्वासां समस्यानां परिहाराय शिक्षा एकः एव प्रकृष्टोपायः । यद्राष्ट्रस्य शिक्षाव्यवस्था यथा सुव्यवस्थिता सुदृढा सुनिश्चिता च तद्राष्ट्रस्य मानवः तथैव विकसितः उत्कृष्टश्च । यदि शिक्षा न व्यवस्थिता न सुनिश्चिता तर्हि जनः अविकसितः राष्ट्रमविकसितं वा सुतरां भवति । तदर्थं शिक्षा व्यवस्थिता भवेत्, किञ्च आवश्यकतानुगुणं पाठ्यचर्यायां परिवर्तनम् आवश्यकं वर्तते। भारतीयशिक्षाव्यवस्था यद्यपि विश्वस्य इतरदेशीयशिक्षाव्यवस्थाभिः साकं समन्वयं स्थापयितुं पाठ्यक्रमाणां निर्माणं करोति तथापि अत्र पाठ्यक्रमेषु शिक्षाव्यवस्थासु च बहुविधाः समस्याः सम्भवन्ति ।

जन्तूनां नरजन्मदुर्लभमतः पुंस्त्वं ततो विप्रता इति शङ्करभगवत्पादानां वचनानुगुणं भाषिकचिन्तनविषये नरस्य श्रेष्ठत्वं सर्वेषां प्रतिभाति । प्रपञ्चेऽस्मिन् विद्यमानेषु प्राणिषु व्यवहारिकदृष्ट्या भाषाज्ञानदृष्ट्या च मानवः एव श्रेष्ठत्वमाप्नोति । सम्प्रेषण-माध्यमरूपेण भाषा एव मानवस्य प्रमुखगुणः । मनुष्यः परस्परसम्बन्धं स्थापयन् लोकयात्रां प्रवर्तयति । लोकयात्राप्रवर्तनाय भाषैका एव साधनमिति अभाष्यत । भाषां विना मानवजीवनं पशुवत् भवति इति तु निश्चितम् । स्थानभेदेन मानवानां भाषायाः अपि भिन्नता दरीदृश्यते । एतदर्थं वक्तुं शक्यते यत् भाषा हि तेषाम् अधिको विशेषः भाषया हीनाः पशुभिः समानाः इति ।

भाषायाः परिभाषीकरणं Encyclopedia Britannica इत्यत्र एवं प्रकारेण वर्तते –

"Language may be defined as an arbitrary system of vocal symbols by means of which human being, as members of social group and participants in culture interact and communicate."

भाषा एका सामाजिकप्रक्रिया अस्ति । अतः बालकस्य व्यक्तित्वविकासे भाषायाः भूमिका प्रधानभूता भवति । भाषान्तर्गतानि चत्वारि कौशलानि (श्रवणं भाषाणं पठनं लेखनञ्च) अपि सामाजिकविकासाय उपयुक्तानि अपरिहार्याणि च । भाषाकौशलानां शैक्षिकविकासः महत्त्वपूर्णः ।

भाषायाः परिभाषाविषये ब्राह्मणग्रन्थे अस्ति – "लोकव्यवहारे प्रचलितवागेव भाषा शब्देन व्यवहृता" इति ।

**भाषाप्रयोजनानि**

समाजे राष्ट्रे प्रपञ्चे च मानवानां विचारविनिमयस्य प्रमुखसाधनं भाषैव । भाषायाः विश्वम् एकनीडं भवति । भाषायाः आधारेण नरः स्वीयविचारान् उपस्थाप्य अन्येषां विचारैः परिचितः भवति । भाषया स्वपूर्वजानां ज्ञानविज्ञानस्य सङ्क्रमणं भाविसन्ततिषु क्रियते । द्विप्रकारकं भाषाप्रयोजनम् अस्ति – वैयक्तिकं तथा च सामाजिकम् ।

वैयक्तिकम् – पुनः द्विप्रकारकमिदम् । साङ्केतिकप्रयोजनम् उद्दीपनप्रयोजनञ्चेति । भाषायाः प्रयोजनेषु परमप्रयोजनं भावविनिमयः वर्तते । अर्थात् भावग्रहणं भावाविष्करणञ्च ।

[33] चाणक्यनीतिः १०७

भाषणलेखनाभ्यां भावाभिव्यक्तिश्च जायते । भाषाप्रयोजनानि एवं प्रकारेण संक्षेप्तुं शक्नुमः –

1. भाषा भावग्रहणं भावाभिव्यक्तीकरणञ्च करोति ।
2. भाषा संस्कृतिं, सभ्यतां च परिरक्षति ।
3. भाषा व्यवहारज्ञानं सम्पादयति ।
4. भाषा व्यक्तित्वं विकासयति ।
5. भाषा साहित्याभिरुचिं वर्धयति ।

सामाजिकम् – सामाजिककार्यसम्पादने भाषा एकं मुख्यं दृढं च साधनम् । विद्यालयस्तरे कति भाषाः पाठनीयाः ? इति चर्चा बहुभाषाभाषीये भारतदेशे प्राचीनकालात् प्रचलति । भाषायाः विविधरूपाणि भवन्ति, अतः प्रथमस्तरे तावत् भाषाद्वयं माध्यमिकस्तरे भाषात्रयं पाठनीयमिति शिक्षाविपश्चितामाशयः । पुनः काः ताः तिस्रः भाषाः ? मातृभाषा अवश्यमेव पाठनीया । राष्ट्रभाषारूपेण हिन्दीभाषा पाठनीया । अन्ताराष्ट्रियभाषारूपेण आङ्ग्लस्यापि पाठनं करणीयम् । एवं रूपेण तिस्रः भाषाः पाठनीयाः इति सर्वकारेण निर्णितम् । एतदेव त्रिभाषासूत्रमिति नाम्ना प्रसिद्धम् ।

## विद्यालये शिक्षणस्य महत्त्वम्

जीवश्रेष्ठमानवैः कृतानुसन्धानस्य फलमानुष्ठानिकशिक्षा इति। आनुष्ठानिकशिक्षायाः प्रमुखः माध्यमः विद्यते विद्यालयः । शिशोः शिक्षाप्राप्तेः प्रथमस्तरः विद्यते विद्यालयः यस्मात् शिशोः सर्वाङ्गीणविकाशे विद्यालयस्य महत्त्वं सुमहत् विद्यते । विद्यालयः समाजस्य आर्हिस्वरूपः विद्यते इत्यतः विद्यालयः लघुसमाजत्वेन परिगण्यते । अस्मिन् लघुसमाजे यथा भवन्ति छात्राः तथैव भाविसमाजस्य स्थितिः भवितुं शक्यते इत्यतः विद्यालये छात्राणां शिक्षणे अत्यधिकमहत्त्वं प्रदातव्यम् । शिक्षणं यथा विद्यते तथैव छात्राणां मतिः छात्रक्रियाश्च भवन्ति । अतः यादृशः समाजः अस्माभिः कल्प्यते तस्याधारेण विद्यालये शिक्षणस्यावश्यकता विद्यते । सामाजिकविकासैस्साकं छात्राणां वैयक्तिकभिन्नतायाः आधारेणापि शिक्षणं भवेत्, अपि च पाठ्यपुस्तकानामपि निर्माणं तदाधारेण कर्तव्यम् । यतो हि पाठ्यपुस्तकमेव शिक्षणस्यैकः विशिष्टाधारः वर्तते । पाठ्यपुस्तके एव शैक्षिकोद्देश्यानां समावेशः तथा च प्रतिफलनं दृश्यते । पाठ्यपुस्तकम् अवलोक्यैव ऊहितुं शक्यते कानि भवन्ति शैक्षणिकोद्देश्यानि, तथा च के शैक्षणिकविधयः इति । अतः कक्ष्याकक्षशिक्षणे छात्राणां जीवनैस्साकं समाजस्यापि उन्नतेः सूत्रं निहितं विद्यते । अतः शिक्षणस्य महत्त्वं विद्यालयशिक्षणे मानवजीवने प्राणवत् विद्यते । अत्रैव शिक्षणस्य माध्यमभाषाविषये चिन्तनमायाति तथा च सर्वस्याः भाषायाः शिक्षणं तस्याः एव भाषायाः माध्यमेन भवेत्, तदैव भाषाशिक्षणोद्देश्यानि सिद्ध्यन्ति ।

## भाषाशिक्षणोद्देश्यानि

भाषाविषये विस्तृतचर्चा कृताऽग्रे । अत्र भाषायाः शिक्षणोद्देश्यानि विमृश्यन्ते । भाषां विना मानवः मूकः विद्यते । यथा पशूनां व्यथाम् अन्ये अवगन्तुं न शक्नुवन्ति तथैव मूकानां विषयेऽपि । अतः मानवाय भाषा अपेक्षते, यया मानवः स्वाभिव्यक्तिं प्रकटयितुं समर्थः स्यात् । अत्र प्राधान्यं प्राप्नोति मातृभाषा एव । ततः अन्यासां भाषाणां विषये जनाः आग्रहं प्रकटयन्ति । अतः शिशोः प्रारम्भिकस्तरे मातृभाषाशिक्षणम् आवश्यकम् । मातृभाषायाः समुत्तमशिक्षणेन शिशोः आन्तरिकविकासः शीघ्रतया जायते। अस्माकं देशस्तु विविधभाषीयः इत्यतः बहुभाषाः अध्ययनीयाः भवन्ति । अस्मात् भाषाशास्त्रीयैः विद्यालयच्छात्राणां कृते त्रिभाषासूत्रस्य संरचना कृता । अस्मिन् सूत्रे सर्वेषां कृते भाषात्रयस्य अध्ययनाय अवकासः प्रदत्तः । एषु त्रिषु राष्ट्रियभाषा, प्रान्तीयभाषा, शास्त्रीयभाषा (संस्कृतम्) च प्रमुखतया अन्तर्भवन्ति । तथापि एतस्य विषये विभिन्नैः आयोगैः विभिन्नतया परामर्शाः प्रदत्ताः । प्रत्येकमपि आयोगः भिन्नतया परामर्शम् अददात् । त्रिभाषासूत्रे अन्तार्राष्ट्रियभाषायाः आङ्ग्लस्यापि स्थानं कल्पितम् । भाषाशिक्षणस्य उद्देश्येषु कानिचन उद्देश्यानि भवन्त्येवम् –

- देशीयभाषाणां ज्ञानम् ।
- भाषासु विद्यमानज्ञानस्याहरणाय प्रयत्नः ।
- भाषायाः माध्यमेन भारतीयसंस्कृतेः ज्ञानम् ।
- भाषायाः अध्ययनेन भाषासंरक्षणम् ।
- अन्ताराष्ट्रियभाषायाः ज्ञानेन प्रापञ्चिकज्ञानम् ।
- राष्ट्रियभाषाज्ञानम् ।
- भाषाज्ञानेन राष्ट्रियैकतायाः वर्धनम् ।
- राष्ट्रियभावनायाः विकासः च ।

इत्येतादृशानाम् उद्देश्यानां पूर्तये विद्यालयशिक्षणे त्रिभाषासूत्रस्य संरचना कृता, तथा च भाषाशिक्षणस्य व्यवस्था कृता ।

## भाषाशिक्षणे उच्चारणशिक्षणस्य महत्त्वम्

किं नाम उच्चारणकौशलम् ? कथं च उच्चारणं करणीयम् ? इति एतादृशाः प्रश्नाः प्रायेण समुद्भवन्ति । एतादृशानां प्रश्नानां समाधानाय पाणिनीयशिक्षायाम् उक्तम् –

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ।।[4]

भाषाशिक्षणे उच्चारणस्य सन्दर्भे केनचित् कविना अपि उक्तम् –

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्।।

'उत् + चर + णिच् + ल्युट्' इति उच्चारणम् अर्थात् वाङ्निष्पत्तिकरणम् इति । 'उद्घातेन कण्ठाद्यभिघातेन चार्यते निष्पाद्यते' इति उच्चारणम् । एतत् उच्चारणकौशलं जन्मना एव न प्राप्यते । श्रवणेन मननेन निदिध्यासनेन च एतत् कौशलं हस्तगतं भवति ।
वर्णानां शुद्धोच्चारणस्य अभावात् महान् क्लेशः भवति इति सर्वे जानन्ति एव । पाणिनीयशिक्षायाम् अपि शुद्धोच्चारणस्य अभावात् किं जायते इति उल्लिखति –

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।। [5] (५२)

मौखिक-लिखितभेदेन भाषात्मक-सम्प्रेषणं द्विविधम् । सम्प्रेषणे भाषायाः मौखिक-रूपमेव प्राथमिकम् अस्ति । प्रथम-भाषायाः शिक्षणे मुख्यतः भाषायाः लिखित-स्वरूपे विशेषावधानं भवति, अन्य-भाषा-शिक्षणे भाषायाः मौखिक-लिखितयोः प्राधान्यं भवति । श्रवणं, भाषणं, पठनं, लेखनम् इति भाषायाः चत्वारि कौशलानि भवन्ति । भाषाशिक्षणस्य इदम् उद्देश्यं यत् तेषु कौशलेषु छात्राः निपुणाः भवेयुः, उत्तरोत्तरं वर्धनञ्च प्राप्नुयुः इति । "मानवस्य सम्प्रेषणात्मक-क्षमता भाषा-कौशलानां दक्षताधारिता भवति । भाषायाः प्रभावशीलतायाः मानदण्डः बोधगम्यता भवति । जनाः येषां भावानां विचाराणाञ्चाभिव्यक्तिं कर्तुम् इच्छन्ति, तान् कियत्या स्पष्टतया बोधगम्यतया च अभिव्यक्तं कुर्वन्ति इति भाषा-कौशलाश्रितम् अस्ति ।"
संस्कृतशिक्षणसन्दर्भे पठनकौशलस्य सिद्ध्यर्थं शिक्षकस्य आदर्शवाचनं महत्त्वपूर्णं तत्त्वं भवति । आदर्शवाचनस्य समये शिक्षकेण केषुचित् अंशेषु अवधातव्यं भवति, तेषाम् उल्लेखं कृत्वा डॉ. विश्वासमहोदयः लिखति –

"कक्ष्यायां शान्ततायाः रक्षणम्, सर्वेषामपि शब्दानां सुस्पष्टम् उच्चारणम्, अल्पप्राण-महाप्राणादीनां ह्रस्वदीर्घादीनां च साधु उच्चारणम्, लेखनचिह्नेषु विशेषावधानपूर्वकं वाचनं, भावपूर्णं वाचनं च ।"
(डा.विश्वासः, कौशलबोधिनी)

कस्याश्चित् अपि भाषायाः प्रमुखतत्त्वेषु उच्चारणं महत्त्वपूर्णं तत्त्वं भवति । 'भाष व्यक्तायां वाचि' इति धातोः निष्पन्नः 'भाषा' इति शब्दः । भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति भाषा । व्यक्तीकरणं भाषायाः प्रमुखं लक्षणं भवति । व्यक्तीकरणस्य सम्प्रेषणं तदा एव भवितुं शक्नोति यदा उच्चारणं शुद्धं भवति । प्रत्येकम् अपि भाषायाः स्वकीया उच्चारणप्रक्रिया भवति । एतस्याः प्रक्रियायाः अज्ञानेन जनाः मूकाः भवन्ति । अतः भाषाशिक्षणे अधिकं महत्त्वम् उच्चारणस्य उपरि दातव्यं भवति । उच्चारणकौशलस्य विकासः श्रवणकौशलस्य आधारेण भवति । उच्चारणप्रक्रियायाः प्रारम्भः भवति श्रवणात् एव । मातृगर्भात् एव शिशोः भाषाश्रवणम् आरभते । कालक्रमात् यथा सः अन्यस्मात् शृणोति तथैव उच्चारयति । एवमेव भाषिकपरम्परा प्रचलति । किन्तु उच्चारणकौशलस्य विकासस्य अभावात् उच्चारणस्य प्रक्रियायाः ज्ञानाभावात् वा समाजे भाषायाः विकृतानि रूपाणि प्रचलितानि वर्तन्ते । अस्याः उच्चारणप्रक्रियायाः ज्ञानाभावात् एव भिन्नभिन्नभाषाणाम् उपभाषाणां विभाषाणां च उत्पत्तिः जाता जायमाना च अस्ति । यदि वयं भारतीयभाषाः पश्यामः तर्हि सर्वासां भाषाणां जननीभाषात्वेन संस्कृतमेव प्राप्नुमः । संस्कृतस्य उच्चारणप्रक्रियायाः ज्ञानाभावात् भिन्नप्रान्ते भिन्नायाः भाषायाः प्रचलनं प्रारब्धम् । अतः महाभाष्ये उक्तम् –

अतोऽन्ये व्यञ्जनदोषाः । शश षष इति मा भूत् ।
पलाशः पलाष इति मा भूत् । मञ्चको मञ्जक इति मा भूत् ।।
(महाभाष्यम् अ.१।पा.१।आ.१।।)

एतत् उच्चारणकौशलं मानवस्य मुखेन सम्बद्धम् अस्ति । भाषायाः उत्पत्तिरेव मुखात् जाता । अतः वर्णानाम् उच्चारणस्य स्थानानि अपि मुखसम्बद्धानि सन्ति । एतानि स्थानानि उच्चारणं प्रभावयन्ति । प्रमुखतया वर्णोच्चारणाय

[4]२५पाणिनीयशिक्षा .
[5] पाणिनीयशिक्षा ५२

मुखसम्बद्धानि अष्टौ स्थानानि सन्ति । पाणिनीयशिक्षायाम् उल्लिखितम् अस्ति –

> अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
> जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।। (१३)

तर्हि किं नाम स्थानम् ? इत्यस्य आकांक्षायाम् उच्यते - वर्णाभिव्यक्तिप्रदेशः स्थानम् इति । यदा शब्दप्रयोगेच्छा भवति तदा कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति । एवं तत्तत्स्थानेषु अभिव्यक्ताः वर्णाः कण्ठ्यः, तालव्यः इत्येवं शब्दैः अपि व्यवह्रियन्ते । संस्कृतवर्णानां वर्गीकरणम् अत्यन्तं वैज्ञानिकरीत्या कृतं विद्यते । स्वराः व्यञ्जनानि च इति संस्कृतवर्णमालायाः प्रमुखभागद्वयम् अस्ति ।

**अधुना स्वरवर्णानाम् उच्चारणस्थानानि कानि इति पश्यामः**

- प्रत्येकं वर्णस्य उच्चारणसमये यद् अङ्गम् अधिकं सक्रियं भवति तद् उच्चारणस्थानं भवति । 'अ' इति स्वरवर्णस्य उच्चारणे कण्ठः अधिकः सक्रियः भवति । अतः 'अ, आ' वर्णयोः उच्चारणस्थानं कण्ठः अस्ति।
- 'इ' वर्णस्य उच्चारणे 'जिह्वा' 'तालु' स्पृशति । अतः इ, ई वर्णयोः उच्चारणस्थानं 'तालु' अस्ति ।
- 'उ' इति वर्णस्य उच्चारणे ओष्ठौ अधिकौ सक्रियौ भवतः । अतः उ, ऊ वर्णयोः उच्चारणस्थानम् ओष्ठौ स्तः।
- 'ऋ' इति वर्णस्य उच्चारणे जिह्वायाः स्पर्शः मूर्धायां भवति । अतः 'ऋ, ॠ' इति वर्णयोः उच्चारणस्थानं मूर्धा अस्ति ।
- 'लृ' इति वर्णस्य उच्चारणे जिह्वायाः स्पर्शः दन्तेषु भवति । अतः 'लृ' वर्णस्य उच्चारणस्थानं दन्ताः इति सन्ति ।
- 'ए'कारस्य उच्चारणे कण्ठस्य सक्रियता अस्ति । अपि च जिह्वायाः तालुस्पर्शः अपि भवति । अतः 'ए ऐ' वर्णयोः उच्चारणस्थानं "कण्ठ-तालु" इति ।
- 'ओ' वर्णस्य उच्चारणे कण्ठः ओष्ठौ च अधिकौ सक्रियौ भवतः। अतः ओ, औ वर्णयोः उच्चारणस्थानं "कण्ठ-ओष्ठौ " स्तः ।
- अनुस्वारस्य विसर्गस्य च उच्चारणं सर्वदा स्वरवर्णेन सह भवति । यथा - 'अं' इत्यत्र सक्रियम् अङ्गं कण्ठः नासिका च अस्ति । 'अ'वर्णस्य उच्चारणस्थानं कण्ठः अस्ति । अवशिष्टं स्थानम् अस्ति नासिका । अतः अनुस्वारस्य उच्चारणस्थानं भवति नासिका ।
- विसर्गः 'अः' इत्यत्र अवर्णात् पश्चात् 'ह् ' इति ध्वनिः श्रूयते । अर्थात् विसर्गस्य उच्चारणं 'ह्' वर्णसदृशं भवति । अतः विसर्गस्य उच्चारणस्थानं कण्ठः अस्ति ।

**एवमेव व्यञ्जनवर्णानाम् उच्चारणस्थानानि पश्यामः**

- **कवर्गस्य उच्चारणस्थानम्**

'क् ख् ग् घ् ङ्' इति एतेषाम् उच्चारणसमये जिह्वायाः मूलभागे अर्थात् कण्ठभागे स्पन्दनं भवति । अतः 'क् ख् ग् घ् ङ्' इति वर्णानाम् उच्चारणस्थानं कण्ठः अस्ति । एतेषां वर्णानाम् उत्पत्तिः कण्ठात् अस्ति अतः एते कण्ठ्याः उच्यन्ते।

- **चवर्गस्य उच्चारणस्थानम्**

'च् छ् ज् झ् ञ्' इति । चवर्गस्य वर्णानाम् उच्चारणसमये तालु अधिकं सक्रियं भवति । अतः चवर्गस्य वर्णानाम् उच्चारणस्थानं 'तालु' अस्ति । एतेषां वर्णानाम् उत्पत्तिः 'तालु'तः अस्ति अतः एते तालव्याः उच्यन्ते ।

- **टवर्गस्य उच्चारणस्थानम्**

'ट्, ठ्, ड्, ढ्, ण्' इति टवर्गस्य उच्चारणसमये जिह्वा मूर्ध्नः

स्पर्शं करोति । अतः टवर्गस्य वर्णानाम् उच्चारणस्थानं 'मूर्धा' अस्ति । एतेषां वर्णानाम् उत्पत्तिः मूर्ध्नः अस्ति अतः एते मूर्धन्याः उच्यन्ते ।

- **तवर्गस्य उच्चारणस्थानम्**

'त् थ् द् ध् न्' इति तवर्गस्य उच्चारणकाले दन्ताः अधिकाः सक्रियाः भवन्ति । अतः तवर्गस्य वर्णानाम् उच्चारणस्थानं 'दन्ताः' सन्ति । एतेषां वर्णानाम् उत्पत्तिः दन्तेभ्यः अस्ति । अतः एते दन्त्याः उच्यन्ते ।

- **पवर्गस्य उच्चारणस्थानम्**

'प् फ् ब् भ् म्' इति पवर्गस्य वर्णानाम् उच्चारणसमये 'ओष्ठौ' अधिकौ सक्रियौ भवतः। अतः पवर्गस्य वर्णानाम् उच्चारणस्थानम् 'ओष्ठौ' स्तः । एतेषां वर्णानाम् उत्पत्तिः ओष्ठाभ्याम् अस्ति अतः एते ओष्ठ्याः उच्यन्ते ।

- **अन्तःस्थवर्णानाम् उच्चारणस्थानम् -**

- 'य्'वर्णस्य उच्चारणसमये जिह्वायाः तालुस्पर्शः भवति । अतः 'य्' वर्णस्य उच्चारणस्थानं तालु अस्ति ।
- 'र्'वर्णस्य उच्चारणसमये जिह्वास्पर्शः मूर्ध्नि भवति । अतः 'र्' इति वर्णस्य उच्चारणस्थानं मूर्धा अस्ति ।
- 'ल्'वर्णस्य उच्चारणसमये जिह्वा दन्तान् स्पृशति। अतः 'ल्'वर्णस्य उच्चारणस्थानं दन्ताः सन्ति ।
- 'व्'वर्णस्य उच्चारणसमये दन्त-ओष्ठौ अधिकौ सक्रियौ भवतः । अतः 'व्'वर्णस्य उच्चारणस्थानं दन्त-ओष्ठौ स्तः।

- **ऊष्मवर्णानाम् उच्चारणस्थानम्**

- 'श्'वर्णस्य उच्चारणसमये जिह्वा तालु स्पृशति । अतः 'श्'वर्णस्य उच्चारणस्थानं तालु अस्ति ।
- 'ष्'उच्चारणसमये जिह्वा मूर्धानं स्पृशति । अतः 'ष्' वर्णस्य उच्चारणस्थानं मूर्धा अस्ति ।
- 'स्'उच्चारणसमये दन्ताः अधिकाः सक्रियाः भवति । अतः 'स्'वर्णस्य उच्चारणस्थानं दन्ताः सन्ति ।
- 'ह्'उच्चारणसमये कण्ठः अधिकः सक्रियः भवति । अतः 'ह्'वर्णस्य उच्चारणस्थानं कण्ठः अस्ति ।

**वर्णानाम् एतादृशानि एव उच्चारणस्थानानि पाणिनीय-व्याकरणे इत्थं प्रदर्शितानि**

कण्ठस्थानिनः वर्णाः - 'अकुहविसर्जनीयानां कण्ठः' इति सूत्रानुसारम् अवर्णः, कवर्गः, हकारः विसर्गश्च ।

तालुस्थानिनः वर्णाः - 'इचुयशानां तालु' इति सूत्रानुसारम् इवर्णः, चवर्गः, यकारः, शकारश्च ।

मूर्धास्थानिनः वर्णाः - 'ऋटुरषाणां मूर्धा' इति सूत्रानुसारम् ऋवर्णः टवर्गः, रेफः, यकारश्च ।

दन्तस्थानिनः वर्णाः - 'लृतुलसानां दन्ताः' इति सूत्रानुसारं लृवर्णः तवर्गः, लकारः, सकारश्च ।

ओष्ठास्थानिनः वर्णाः – 'उपूपध्मानीयानामोष्ठौ' इति सूत्रानुसारम् उवर्णः, पवर्गः उपध्मानीयः प फ ।

नासिकास्थानिनः वर्णाः - 'ञमङणनानां नासिका च' इति सूत्रानुसारं ञ्, म्, ङ्, ण्, न् वर्णाः अनुस्वारश्च ।

कण्ठतालुस्थानिनः वर्णाः - 'ओदोतौ कण्ठोष्ठम्' इति सूत्रानुसारम् एकारः द्वादशविधः ऐकारश्च द्वादशविधः ।

दन्तोष्ठस्थानिनः वर्णाः - 'वकारस्य दन्तौष्ठम्' इति सूत्रानुसारं वकारः ।

जिह्वामूलीयस्थानिनः वर्णाः - 'जिह्वामूलीयस्य जिह्वामूलम्' इति सूत्रानुसारं क ख ।

**उपसंहार**

भाषाशिक्षणे शिक्षकस्य महत् दायित्वं भवति । प्रत्येकमपि शिक्षकः आदौ स्वयं शुद्धोच्चारणस्य प्रयासं कुर्यात् । तत्रापि वर्णानाम् उच्चारणस्थानानि ज्ञात्वा एव शुद्धोच्चारणस्य प्रयासः करणीयः । अतः शिक्षकाणां परमं कर्तव्यं भवति यत् शिक्षकाः स्वयम् उच्चारणस्थानानुगुणं शुद्धम् उच्चारयेयुः, पुनः च छात्रेभ्यः अपि उच्चारणस्थानानां ज्ञानं दत्त्वा शुद्धम् उच्चारयितुं प्रेरयेयुः । शिक्षकाः न केवलं वर्णोच्चारणस्थानस्य ज्ञानं कारयेत् अपि तु कथं वर्णानां स्थानानुगुणम् उच्चारणं करणीयं तदपि ज्ञापयेयुः । यथा प्रारम्भे एव पाणिनीयशिक्षायाः अयं श्लोकः उक्तः यत् –

> व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
> भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ।। [6]

उच्चारणसन्दर्भे छात्राः केषां वर्णानाम् उच्चारणे दोषं कुर्वन्ति इति शिक्षकैः ज्ञातव्यम् । यथा केचन छात्राः ख इत्यस्य स्थाने क/ग, खादामि इत्यस्य कादामि/गादामि इति, घ इत्यस्य स्थाने ग, घण्टा इत्यस्य गण्टा इति, अ इत्यस्य ओ / ए, अहम् इत्यस्य ओहम्/एहम्, छ इत्यस्य च, ठ इत्यस्य ट, पठति इत्यस्य पटति, थ इत्यस्य द इति, तथा इत्यस्य तदा, ध इत्यस्य द इति, धरणी इत्यस्य दरणी, ण इत्यस्य न इति, कारणम् इत्यस्य कारनम् इति उच्चारयन्ति । श ष स इत्यादीनाम् उच्चारणस्य विषये तु सर्वत्र अधुना दोषः एव दृश्यते । अतः उच्चारणस्य स्थानानाम् आधारेण शिक्षकैः स्वयं ज्ञात्वा प्रायोगिकरूपेण अभ्यासः कारणीयः । अभ्यासेन एव उच्चारणगतदोषाः दूरीकरणीयाः ।

उच्चारणगतदोषाणां चयनस्य अनन्तरं शिक्षकैः छात्रैः कृतानां दोषाणां कारणानि अपि ज्ञातव्यानि भवन्ति । यतः प्रत्येकम् अपि कार्यस्य किञ्चित् कारणं भवति एव । शिक्षकाः निश्चयेन छात्रकृतदोषाणां कारणं जानीयुः । उच्चारणगतदोषाणां कानिचन कारणानि एवमपि भवितुं शक्नुवन्ति–

- वर्णानाम् उच्चारणस्थानस्य ज्ञानाभावः ।
- यस्मात् छात्राः शृण्वन्ति तस्य उच्चारणे दोषः ।
- जिह्वायाः जठरता ।

---

6२५पाणिनीयशिक्षा .

- दन्तानां न्यूनता आधिक्यं वा ।
- जिह्वायाः ह्रस्वता दीर्घता वा ।
- श्रवणदोषः ।
- मुखे लालास्रावस्य आधिक्यम् ।
- वर्तन्याः अज्ञानता ।
- भयम् अथवा सङ्कोचः ।
- उपयुक्ताभ्यासस्य अभावः ।
- श्रवणाभावः ।
- वर्णमालायाः अज्ञानता ।

एवमेव शिक्षकाः अपि स्वविद्यालयस्य छात्राणाम् उच्चारणगतदोषाणां किं कारणम् इति अवगन्तुं प्रयत्नं कुर्युः । छात्राणाम् उच्चारणगतदोषाणां कारणज्ञानस्य अनन्तरं शिक्षकाः कथं दोषाणां निवारणं कर्तुं शक्नुयुः इति विषये प्रयत्नं कुर्युः । यतः पूर्वमेव उक्तं यत् छात्राणां प्रत्येकमपि दोषस्य निवारणोपायाः शिक्षकाणां हस्ते भवेयुः इति । उच्चारणगतदोषाणां निवारणाय केचन उपायाः एवमपि भवितुं शक्नुवन्ति –

- शिक्षकाः स्वयं शुद्धम् उच्चारणं कुर्युः ।
- वर्णानाम् उच्चारणस्य अधिकाधिकम् अभ्यासं कारयेयुः ।
- पदस्तरे वाक्यस्तरे च वर्णोच्चारणस्य अभ्यासं कारयेयुः ।
- कक्ष्यायाम् अधिकाधिकं पठनं कारयेयुः ।
- शुद्धोच्चारणयुक्तायाः दृश्यश्रव्यसामग्र्याः द्वारा छात्रान् श्रावयेयुः ।
- क्रीडाङ्गणादिषु छात्रान् नीत्वा उच्चैः वर्णानाम् उच्चारणं कारयेयुः ।
- वर्णान् उच्चार्य अक्षराणि चेतुं वदेयुः ।
- येषाम् उच्चारणे अधिकक्लेशः भवति तेषां कृते प्रत्येकं वर्णस्य उच्चारणस्थानस्य विशेषतया बोधनं कारयेयुः ।
- कक्ष्याशिक्षणे आदर्शवाचनं शुद्धतया स्पष्टतया च कुर्युः ।
- अनुवाचनसमये कः छात्रः कुत्र उच्चारणे दोषं करोति इति फलके विलिख्य पश्चात् शुद्धोच्चारणं कारयेयुः ।

एवमेव शिक्षकाः छात्राणां शुद्धोच्चारणस्य कृते प्रयासं कुर्युः । तदा एव प्रत्येकं छात्रस्य उच्चारणकौशलस्य विकासः भविष्यति ।

**सन्दर्भग्रन्थसूची**


1. पाणिनीयशिक्षा
2. चाणक्यनीतिः
3. ऋग्वेदः 10.129.1.
4. अग्रवाल्, एस् के., शिक्षा के तात्त्विकसिद्धान्त, राजेश पब्लिकेशन्स्, मेरठ, 1982.
5. अल्तेकर, डा. अनन्त, प्राचीन भारतीय शिक्षण पद्धति, नन्द किशोर एण्ड ब्रदर्स, वाराणसी, 1968.
6. पाठक, पी.डी, भारतीय शिक्षा और उसकी समस्याएँ, विनोद पुस्तक मंदिर, आगरा, दिव.सं. 1976.
7. पाठक पी. डी., त्यागी जी. एस., शिक्षा के सामान्य सिद्धान्त, विनोद पुस्तक मन्दिर, आगरा.
8. पाण्डेय, प्रो. रामशकल, संस्कृतशिक्षण, विनोद पुस्तक मन्दिर, आगरा, 1995.
9. डा. विश्वासः “कौशलबोधिनी” संस्कृतभारती, 2005
10. शर्मा अपूर्वः - माध्यमिकस्तरीयच्छात्राणां संस्कृतलिखिताभिव्यक्तिकौशलविकासाय उपायानाम् अन्वेषणम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2013 (एम्. एड.)
11. शर्मा अपूर्वः - असमप्रदेशे माध्यमिकस्तरीयसंस्कृतपाठ्यपुस्तकानां मूल्याङ्कनात्मकमध्ययनम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2014 (एम्. फिल्.)
12. शर्मा अपूर्वः - असमराज्यस्थसंस्कृतशैक्षिकसमस्यानां निदानात्मकमध्ययनम्, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, 2017 (पीएच. डी.)